त्रके चिद्वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयमसंभवद्वस्तुसंबंधनिबंधनमि
ति तृतीयात्संभवद्वस्तुसंबंधनि[illegible] निबंधनेति व्यवहरंति तथाहि आद्यनि
दर्शनायां वाक्यार्थयोरैक्यमसंभवत्तयोः साम्ये पर्यवस्यति द्वितीयनिदर्शनाया
मप्यन्यधर्मोऽन्यत्रासंभवत् धर्मिणोः साम्ये पर्यवस्यति तृतीयनिदर्शनायां
तु स्वक्रियया परान्प्रति सदसदर्थबोधनं संभवदेव समस्तो गंभीकरोति बोधयन्
गृह्णमेधिनः स्यादेकाकीशोभिरथ्यापयतीतिवत्समर्थाचरणेनान्यः प्रयोगः
ततश्चयथाकारीशोभिः शीतापनयनेन बहून् धायनसमर्थान्करोति एवं वारण
मानः पर्वतः स्वयमुपमानभावेन गृह्णमेधिन उपमाबोधनसमर्थान्कर्तुं क्षमते २
यथा अयं पर्वतः समभातेराविंध्यारसासंभावयति एवं च गृह्णमे[illegible] समागते
संतमुचितसृजया संभावयेदिति अतः संभवतिबोधनसंबंधय इति व्यतिरेको
विशेषश्चेदुपमानोपमेययोः शैलाइवोन्नताः संतः किंनु प्रकृतिकोमलाः ५२
अयमुपमेयाधिक्यपर्यवसायी व्यतिरेकः यथा वा पल्लवतः कल्पतरोरेषवि

स्वविशेषणत्वेन स्वीकरोतीत्यर्थः
दृष्टांततया बोध्यं न स्येवनच विवृति तन्त्वेन [illegible] वोपपादयति बो[illegible] धयन्नित्यादिना
करीषंश्रुमगो मयं तस्यायं करीषः समर्थाच रणे समर्थकरणे साम २१ ष्येपा पादनेयावेर भाव

वाक्यार्थवृत्तिनिदर्शना पदार्थवृत्तिनिदर्शना — २ प्राधान्यात् उपमा
एवं प्रदर्शिते निदर्शना नया वेन दृष्टांतत्वेन
त्रयी निदर्शनापदत्र [illegible] निमित्त स्यैकस्याभा

घोषः कारस्य ते वीर भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते तत्रानन्तपर्यवसायी
यथा रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायांति शिलीमुखाः स्मरध
नुर्मुक्तास्तथा मामपि कांतापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यम
शोक केवलमहं धात्रा सशोकः कृतः अनुभयपर्यवसायी यथा दृढतरनिबद्धमु
ष्टेः कोशनिषण्णस्य सहजमलिनस्य कृपणस्य कृपाणस्य केवलमाकारतो भेदः सहो
क्तिः सहभावश्चेद्भासते जनरंजनः दिगंतमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह ५३
यथा वा छायासंश्रयते तलं विटपिनो श्रांतेव पान्थैः समं मूलं याति सरोजलस्य ज
डता ग्लानेव मीनैः सह आचामत्यहिमांशुदीधितिरयं तप्तेव लोकैः समं निद्रा गर्भ
गृहं सह प्रविशति क्लांतेव कांताजनैः जनरंजनस्तु केः अनेन सार्द्धं विहरांबुराशे
रित्यादौ न सहोक्तिरलंकारः विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते विद्याहृद्या
पि साऽवद्या विना विनयसंपदं ५४ यथा वा यस्य रामं न पश्येत्तु यं च रामो न पश्यति
निंदितः स भवेल्लोके स्वात्माप्येनं विगर्हते अत्र रामदर्शनं विना निंदितत्वं विना प्र

अत्र सहोक्तिः चमत्कारिणा तेकारस्तु पोस र्थः = २

च^

वराणि =

अत्र प्रस्तुताया विद्याया विनयं विना २४ उपलक्षितम् = २
रामकर्मकं रामकर्तृकं दर्शनं विनेत्यर्थः = २

इयंचकिंचिद्व्यतिरेकेणाप्रस्तुतस्यरम्यत्वारम्यत्वाभ्यांतरवर्णनंविनोक्तिः इतिप्रकारद्वयसाधारणंसामान्यलक्षणंबोध्यम्

नये

नत्रप्रस्तुतं किंचिद्विनारम्यंस्यात्साविविनोक्तिः कथ्यते इत्यन्वयः

हृमंतेरणापिप्रदर्शितं नद्येकिंचिद्विनारम्यंविनोक्तिःसापिकथ्यते विनाखलैर्विभाः
ऊ॰ने॰ तिघाराजेंद्रभवतः सभा ५५ यथावा आविर्भूते शशिनितमसामुच्यमानेवरात्रिर्नै
२२ शस्यार्च्चिर्हुतभुजइवच्छिन्नभूयिष्ठसभा मोहेनांतर्वरतनुरियंलक्ष्यतेमुक्तकल्पागं
एवंचविशेषणमात्रसाम्यगम्यावृत्ततवृत्तांतर्क्रीणबोध्यम्
गारोपात्पतनकलुषांबिभ्रतीवप्रसादं अत्रतमःप्रभृतीनिविनामुक्तादीनांरम्यत्व निशा
विनाप्राह्मेतरेणादर्शिते समासोक्तिःपरिस्फूर्तिः प्रस्तुतेप्रस्तुतस्यचेत् अयमैंद्री
मुखंपश्यरक्तश्चुंबतिचंद्रमाः ५६ यत्रप्रस्तुतेधर्मिणिवर्ण्यमानेविशेषणसामर्थ्य प्रा ३ =
लादप्रस्तुतधर्मिणस्तस्यापिपरिस्फूर्तिस्तत्रसमासोक्तिरलंकारः समासेनसंक्षेपेणप्र वंधस्य॰ न॰
प्रतिपादनात् स्तुताप्रस्तुतधर्मिणोर्वचनात् उदाहरणमयमैंद्रीति अत्रचेंद्रस्यप्राचीदिक् प्रा प =
रंभसंबंधलक्षणेउदयेवर्ण्यमानेमुखपदसंप्रारंभवदनसाधारणाद्रक्तपदस्या
खुं = रुणकामुकसाधारणाच्चुंबतीत्यस्यप्रस्तुतार्थसंबंधमात्रपरस्यप्राकाशार्थीतरसाधा
रणात्वचंद्रमाःप्राग्दिगतपुंलिंगेनेंद्रीगतस्त्रीलिंगेनतत्प्रतिपादेंद्रसंबंधित्वेनचोप
उपस्कृतादिति सर्वे साधरणादिर्विशेषणम् स्फुरितात्प्रस्तुतपरवनितासक्तपुरुषधर्मिणः प्रतीयते यथावा व्यावल्गत्कुचभा २२

ॐ नायकत्वाभिव्यक्त्यौ = व्यवहारोमुखचुंबनरूपः।
नायिकानुरक्तस्यकस्यचिन्नक्रीडालंबनं कंदुकंचन्द्रोक्तिः = २

रमाकुलकचेव्यालोलहारावलि प्रेंखत्कुंडलशोभिगंडयुगलं प्रस्वेदबिंद्वंबुजं प्रास्य
दत्तकरप्रहारमथिकाख्यासंरंभादेतया यस्मात्कंदुक सादरं सुभगया संसेव्यसे तत्कृती
अत्र कंदुकवृत्तांते वर्ण्यमानेप्यावलात् कचभारमित्यादिक्रियाविशेषणसाम्याद्वि
परीतरतासक्तनायिकावृत्तांतः प्रतीयते सर्वत्र विशेषणानि श्लिष्टानि इह साधार
णानीति भेदः सारूप्यादपि समासोक्तिर्दृश्यते यथा पुरायत्र स्रोतः पुलिनमधु
नात्र सरितां विपर्यासं यातो घनविरलभावः क्षितिरुहाम् बहोर्दृष्टं कालादपर
मिव मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति अत्र वनवर्णनेऽप्र
स्तुते तत्सारूप्यात्कुटुंबिवृत्तसंतानादिसमृद्ध्यसमृद्धिभ्यां विपर्यासं प्राप्तस्य तत्स
मास्य ग्रामनगरादेर्वृत्तांतः प्रतीयते अत्र च विशेषणसाम्यात्सारूप्याद्वा यद
प्रस्तुतवृत्तांतस्य प्रत्यायनं तत्प्रस्तुते विशेष्ये तत्समारोपार्थं सर्वथैव प्रस्तुतानव
च्छिन्नः कविसंरंभगोचरत्वासंयोगात् अतश्च समासोक्तावप्रस्तुतव्यवहारसमारो
पहेतुः न तु रूपकवत्प्रस्तुते अप्रस्तुतरूपसमारोपोऽप्यस्ति सुखं चेदं तत्र मुखेवं

श्रीरुता

जा

द्रत्वारोपहेतुः मुखचंद्रप्राहृ समभिव्याहारवदुक्तसंबुद्धतिचेदुमाउन्यादिसमासेत्तुदा

कु॰ नं॰ ४३ हरणे चंद्रादौ नीरत्वाद्यारोपहेतोस्तद्वाचकपदसमभिव्याहारस्याभावात् निरीक्ष्य वि

द्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः धारानिपातैः सह किं नु वांतश्चंद्रो

यमित्यार्ततरं ररास इत्याद्येकदेशविवर्तिरूपकोदाहरणेष्वप्रस्तुतेः प्रस्तुतरूपसमा

रोपगमकस्याप्यभावात् न चात्र हि विद्युन्नयनैरित्यत्र निरीक्षणानुगुण्यात् उत्तरपदार्थ

प्रधानरूपमयूरव्यंसकादिसमासव्यवस्थितायामुत्तरपदार्थभूतनयनस्यानुरोधात्

पयोदेऽनुक्तमपि द्रष्टृरूपत्वारोपणमभ्युपगम्यते न चेदं तथा निरीक्षणत्वात् त्वया

गते किमिति वेपत यष्टि सिंधुरिति श्लोके न सेतुकृत्त्वादिवद्वाप्रस्तुतासाधारणवृत्तांत

स्यापि विद्युन्नयनवत् प्राधान्यमस्ति येन तदनुरोधात्वे सेतुमंथकृत्त्वादिन्यत्रैवं वानुक्त पयोदस्यत्वेव

मपि प्रस्तुते प्रस्तुतरूपसमारोपमभ्युपगच्छेम तस्माद्विशेषणसमर्पिताप्रस्तुतव्य

वहारसमारोपमात्रमिह चारुताहेतुः यद्यपि प्रस्तुताप्रस्तुतवृत्तांतयोरिह श्लिष्टसा

धारणविशेषणसमर्पितयोर्भिन्नपदोपात्तविशेषणयोरिव विशेष्येणैव सासाद ४३

उपात्तोस्ति । नाविश्लिष्टसाधारणादिविशेषणसमर्पि
तयोः प्रस्तुताप्रस्तुतवृत्तांतयोरप्रस्तुतवृत्तांतः ५

नयादृष्टिसमग्राथान्ये तथाप्यप्रस्तुतवृत्तान्तान्वयानुरोधान प्रस्तुतेऽप्रस्तुतसमारो
पोङ्गीकार्यः तथाहि यथाप्रस्तुतविशेष्यं नास्ति अप्रस्तुतवृत्तान्तस्यान्वययोग्यता ।
तथैवाप्रस्तुतेऽपि जारादौ नास्ति प्रस्तुतवृत्तान्तस्यान्वययोग्यता एवं च समग्रस्या नयोः
प्रकृताप्रकृतवृत्तान्तयोरन्यतरस्यावश्यं समारोपेऽभ्युपगते वेकृते एवं प्रस्तुतेऽप्र
स्तुतवृत्तान्तस्यारोपस्याभ्युपगमादेतुरिति युक्तं ननु एवं सति विशेषणसाम्यादप्रस्तुतस्य
गम्यत्वे समासोक्तिः विशेषणानां साम्येन यत्र प्रस्तुते वर्त्तिनामप्रस्तुतस्य गम्यत्वे
सा समासोक्तिरिष्यते इत्यादिप्राचीनानां समासोक्तिलक्षणानि न संगच्छेरन् प्रस्तु
ते स्त्रियस्साधारणादिरूपविशेषणसमर्पितानुरागस्वैकवदनचुम्बनाय प्रस्तुत
वृत्तान्तसमारोपमात्रस्य चारुत्वादेतुत्वाभ्युपगमे विशेषणसाम्यकृतकार्म्यकाय प्र
स्तुतधर्मिव्यञ्जनानपेक्षणादिति चेत् उच्यते स्वरूपतो प्रस्तुतवृत्तान्तस्यारोपेन चा
रुत्वाहेतुत्वा किंत्वप्रस्तुतकामुकादिसंबन्धित्वेनावगम्यमानस्य तस्यारोपस्यानु
तस्यैव रसानुगुणत्वात् न च तावदवगमने विशेषणपदानां सामर्थ्यमस्त्यतः स्फे

षादिमहिम्ना विशेषणपदैः स्वरूपतः समर्थिते न वदनं तु वनादिना तत्संबंधिनि॰
कु॰ नं॰ २४ कामुकादावभिव्यक्तेष्वनलंदीयत्वानुसंधानं तत्र भवति यथा स्वरूपतो दृष्टेन
राजाश्वादिना तत्संबंधिनि राज्ञादौ स्मारिते ष्वनश्वादौ नंदीयत्वानुसंधानं तद्वदिति था॰
विशेषणसाम्येन वाच्योपकारकस्याप्रस्तुतव्यंजनस्यासंभवेदा अत एवास्मिन्विशे
षणाख्यामिव साधारणविशेषणाख्यामप्यप्रस्तुतव्यवहारसमारोप इत्येव प्राचीना
नां प्रवादः केडके तु व्यावलोक्य चभारत्वादिविशिष्टचलितानामेव्यत्वस्य कामुकसं
बंधित्वेनैव समारोपणीयत्वात् स्वरूपतः केडकेपि तत्सहत्वेनासमारोपणीयत्वा
त् किंच सामान्यनिबंधनत्वेनोदाहृतायां समासोक्तावप्रस्तुतवृत्तांतस्य प्राधान्यार्थ
स्याप्रस्तुतवृत्तांतरूपेणैव गम्यतानेन रूपेणैव तस्य समारोपसिद्धेरन्यत्रापि तथै
व स्वक्रममेवं प्राचीनानां लक्षणं विभावनीयम् अलंकारः परिकरः साभिप्राये विशे
षणे सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ५७ अत्र सुधांशुकलितोत्तंस इ
ति विशेषणं तापहरणसामर्थ्याभिप्रायगर्भम् यथा वा तव प्रसादात्कुसुमायु २४

योपिसदायमेकंमधुमेवलक्ष्मीकर्योहरस्यापिपिनाकपाणेर्धैर्यच्युतिंकेममधन्
न्विनोन्ये अत्रपिनाकपाणेरितिद्वविशेषणंक्रमसमाश्रयत्वेनार्थलभ्यात्मसर्थवि
५८ शेषाणांचसारभूतार्थयत्वाभिप्रायगर्भम् यथावा सर्वोम्भविनियानस्फकृतप्रस
क्तिनाश्रितः शरीरकस्यापिकृतेमूढाः पापानिकुर्वते अत्रशरीरविशेषणानितस्य
हेयत्वेनासंरक्षणीयत्वाभिप्रायगर्भाणि यथावा व्यासस्यैकतयास्थितेश्रुतिगणे
जन्मीनवल्मीकतो नाभौनाभवमच्युतस्यसुमहद्भाष्यंचनाभाषितम् चित्रार्थे
नहन्तकथ्यामचकथंश्रुतमित्राणांसंयुत देवत्वंहृणाहे देवाणीनमद्दुकर्तृकंकथंप्रा
म न्नुयात् अत्रश्रुतिगणानव्यासस्येत्यादीनिविशेषणानितस्मिन्व्यासमाधसाथा
रणकार्यकारणत्वप्रतिषेधमुखेननादृत्व्यासत्वादिक्रमभिप्रायगर्भाणि तत्राशो
दाहरणयोरेकैकंविशेषणं समनन्तरयोरुदाहरणयोः प्रत्येकंबहूनिविशेषणानि
तत्रापिप्रथमोदाहरणेसर्वाणिविशेषणाभिप्रायगर्भाणिपदार्थरूपाणिच द्वि
तीयोदाहरणेभिन्नाभिप्रायगर्भाणिवाक्यार्थरूपाणिचेतिभेदः तेषुचयथार्थसद्भावे

पिनधनिव्यपदेशः इत्यस्यतापहारिणोमर्मन्यस्यचकेस्तुत्यमायेनसर्वैथन्विर्थैर्यहारिणा
ऊ॰न २५ शारीरहरणार्थेपापमाचरतांमूहत्वेहरस्यवर्णनीयराजगुणाकथनाशाकत्वेचवाच्य
एवोपस्कारकत्वात्तएवसंग्राह्यस्थावाच्यपरिकरत्वात्परिकरइतिनामास्यालंकार
स्य केचित्तुतिप्रयोजनविशेषणोपादानेप्रस्थैर्यदोषस्योक्तत्वात्सप्रयोजनत्वेवि
शेषणस्यदोषाभावमात्रेनकश्चिदलंकारः एकनिष्ठतादृशानेकविशेषणोपन्या
सः परंवैचित्र्यविशेषात्परिकरइत्यलंकारमध्येपरिगणितइत्याहुः वस्तुतस्त्वनेक
विशेषणोपन्यासएवपरिकरइतिननियमः श्लेषयमकादिष्वप्रयोज्येत्वदोषाः
भावेन तत्रैकस्यापिविशेषणस्यसाभिप्रायविन्यासेविच्छित्तिविशेषस्यसद्भावा
त्परिकरत्वोपपत्तेः यथा प्रतियजेतनिर्जायदिदेवतामभयतस्मावतेज्वषतेय्य
ध्वं र्षे हितिभ्रतैवसदैवतकावयंवनवतानवताकिमहिद्रुहा अत्रप्रहृतसज्जाधु
कान्नेद्रादीन्प्रतिभगवतःकृष्णस्यवाक्यंगोवर्द्धनगिरिरेवास्माकंरक्षकत्वेनदैवतामि
तिसएववसज्जनीयोनारक्षकः प्रहृत्तांरित्येवंपरोवनवतेतिगोवर्द्धनगिरेर्विशेष २५

णम् कानननवत्वान्निर्झरादिमत्वाच्च पुष्पफलान्तरजलादिभिरारण्यकानामस्माकं
मस्मद्गवानां च गवामप्ययमेवर्त्नकरइत्यभिप्रायगर्भं एवमत्रैकस्यापि साभिप्रा
यविशेषणविन्यासस्य विच्छित्तिविशेषवशादलंकारत्वसिद्धावन्यत्रापि स्तुत्याप्रक
लितोक्तेर्मस्त्वादौ तस्यात्मलाभो न निवार्यते अपि च एकपदार्थहेतुकं काव्यलि
गमलंकारान्तरमिति सर्वसंमतः तद्वदेवैकस्यापि विशेषणस्य साभिप्रायस्यालंकारत्वमु
क्तमेव साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः चतुर्णां पुरुषार्थानां दाता देवश्च
तुर्भुजः ५८ अत्र चतुर्भुजइति विशेष्यं पुरुषार्थचतुष्टयदानसामर्थ्याभिप्रा
यगर्भम् यथा वा फणीन्द्रस्ते गुणान्वक्ति लिखितं हेहस्याधिपः द्रष्टुं मार्कण्डलसा
न्दात्कालमेषक्ते गुणाः फणीन्द्रइत्यादिविशेष्यपदानि सहस्रमुखत्वाद्यभिप्रा
यगर्भाणि नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः सर्वदोमाधवः पायात्स यो
गंगामदीधरत् ५९ अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना उच्चरद्भूरिकीलालः शु
शुभे वाहिनीपतिः ६० अनेकार्थशब्दविन्यासः श्लेषः स च त्रिविधः प्रकृतानेक

अप्रकृतानेकविषयः ५१

क.नं. २६ 26

विषयः प्रकृताप्रकृतानेकविषयस्तत्र सर्वदेत्यादिक्रमेणोदाहरणानि सर्वदो
माधवः इति स्तोतव्यत्वेन प्रकृतयोर्हरिहरयोः कीर्तने प्रकृतश्लेषः अब्जंकमलम
ब्जश्चंद्रस्तयोरुपमानमात्रत्वेनाप्रकृतयोः कीर्तनमित्यप्रकृतश्लेषः वाहिनीपतिः
सेनापतिः समुद्रश्च तत्र समितौ प्रसन्नप्रयातोऽस्थितत्वपिरस्य सेनापतेरेव वर्णनं प्र
कृतमिति प्रकृताप्रकृतश्लेषः यथा वा भ्रातःकाकोदरो येन द्रोग्धापि करुणाम
ना हतनामा रणाय स्यात् समेत्य पराणां विभुः नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमु
खैः सदृशे वनवृद्धानां कमलानां त्वदीक्षणे असाउदयमारूढः कांतिमान्रक्तमंडलः
राजा हरति लोकस्य हृदयं मृदुभिः करैः अत्राद्ये स्तोतव्यत्वेन प्रकृतयो रामकल
योः श्लेषः द्वितीये उपमानत्वेनाप्रकृतयोः पद्महरिणयोः श्लेषः तृतीये राजनि
वर्णनप्रस्तावे प्रकृतस्य प्रत्यग्रोदितचंद्रस्याप्रकृतस्य नवाभिषिक्तनृपतेश्च श्ले
षः यदत्र प्रकृताप्रकृतश्लेषोदाहरणे प्राहुः शक्तिमूलध्वनिमिच्छंति प्राचस्तत्र
प्रकृताप्रकृताभिधानमूलकस्योपमादेरलंकारस्य व्यंग्यताभिप्रायं न तु प्रकृतार्थ २६

ननु प्रकरणेनाभिधायानियमनादप्रकृतार्थस्य व्यंग्यत्वमेवेति कथं श्लेष इत्याशंक्याह यद्यत्रेति =

नैवं वंशशब्दशक्तिमूलत्वं तु ध्वनेरुक्ते दृ इति वाच्यम् शनिरशनिश्च तमुच्चैर्निहंति कुप्यसि नरेन्द्र यस्मै त्वम् यत्र प्रसीदसि पुनः स भात्युदारोऽनुदार
श्चेत्यत्र शनिरिति विरुद्धरूपे प्रस्तुते शनिशब्देनाभिधायां प्रतीयमानेऽपि तन्मूलकस्य विरुद्धा
वपि वदनुवक्तेनार्थ मेककार्यकारित्वं इति वस्तुध्वने स्थाने शब्दशक्तिमूलत्वस्य संभवात् श्लेषो

रस्येत्यस्योपलक्षणत्वात् अन्योन्यसन्निधानबलात्

सैव वंश्यत्वाभिप्राये अप्रकृतार्थस्यापि शक्त्याप्रतिपाद्यस्याभिधेयत्वावश्यंभावे
नव्यात्यनपेक्षत्वात् यद्यपि प्रकृतार्थप्रकरणबलात् झटिति बुद्धिस्थमस्तेव प
श्चात् पतितमुत्थापनादिवा किंनो राजकरादिपदानां अन्योन्यसन्निधानबलात्त
द्विषयप्राप्त्यंतरोन्मेषस्वैकमप्रकृतार्थः स्फुरेत् न तावता तस्य व्यंग्यत्वेन त्वा
प्रतिपाद्यमाने सर्वथैव व्यक्त्यनपेक्षणात् यद्यवक्षिते प्रकृतार्थाभिधाने पश्चा
त्स्फुरति चेत्काममस्तु ध्वनिरेव भवतु अस्ति चान्यत्रापि शब्दश्लेषः यथा अयमति
जरठां प्रकाममगुर्वीरलघुविलंबिपयोधरोपरुद्धाः सततमसुमतामगम्यरूपाः प
रिणतदिक्करिकास्तटीर्बिभर्ति १ अंतर्मत्रिमदुग्ध्येमोपलादर्पितश्रीपयश्चामव
नमः हृस्यत्रिमिरजं भिषेविरोदोषमोषधिपतेरसन्निधौ १ अत्र हि समासोक्त्यु
दाहरणयोः प्राकरणिकेष्टप्रकरणावगमात् झटिति बुद्धिस्थे विशेषणसाम्यादप्रस्तु
तोऽपि वृद्धेऽपि व्याहृत्तांताः प्रतीयते तन्न समासोक्तेरंगं श्लेषः इति सर्वेषामभिमत
पक्षः यत्र मन्यत्रापि श्लेषे शब्दध्वनिबुद्धिर्न कार्या यथा वा रम्या इति प्राप्तवतीः प

नाकारागे विविक्ताहरिवर्द्धेनौ: यस्यामसेवंतनमहलीकाः ममेव भूमिवेलभी
ऊ.नै. र्भुवानः अत्र हितीयांनादिविशेषणसमर्पितार्थान्तराणांमध्याह सामर्थ्येन वसुभि
२० रन्वयः विभक्तिभेदात् नचविभक्तिभेदेपितदन्वयादेपकेसाधर्म्यमिहतिवद
५ भक्तियतः पतस्मिन्नपिकपूयः श्रियेवदंत्याः संतोभपवनमृवाजवेनमीताः वा
लीकेरत्हितरामलदमणानिसाधर्म्यंदथतिगिरामद्रसरत्याः इत्यत्रेवार्तिमत्स्रषा
१८ भवेत्तु मैमित्येतनु क्रियाविशेषणं सहार्थेवेनाभ्युपपन्नेवसंभुन्किञ्चविशेषणं
र्थोन्वयात्प्रागद्राग प्रतीतेः सामर्थ्यानावलंबते तस्मादर्थमोदर्यबलादेवतदन्व
यानुसंधानमितिगूढश्लेषः तदन्तुतद्बलादेवसमवाहुस्य साधर्म्यार्थेवकल्पन
मितिवाच्यस्यवोपमालंकारस्यांगमयं श्लेष इत्यलमतिप्रपंचेन तस्मिद्धःश्लेषत्रै
विध्यं एवंश्लेषः प्रकारान्तरेणापिद्विविधःसंपन्नः उदाहरणान्तरेषु अत्रकीलालया
हिनीपत्यादिशब्देषु परस्परं विलक्षणपदभंगमनपेक्ष्यनानार्थक्रोडीकारादभंग
श्लेषः सर्वदोमाधवोयोगं गामहारिणाहितसक्तिनेत्यादिषु परस्परं विलक्षणपदभंग २०

मधेस्पनानार्थ्यक्रोडीकारात्सभंगश्लेषइति तत्र सभंगश्लेषे शब्दालंकारः अभंगश्ले
षस्त्वर्थालंकारः इति केचित् उभयमपि शब्दालंकार इत्यन्ये उभयमप्यर्थालंकार इ
ति स्वाभिप्रायः एतद्विवेचनं तु चित्रमीमांसायां द्रष्टव्यं अप्रस्तुतप्रशंसास्यात्सायत्र
प्रस्तुताश्रया एकः कृती शकुन्तेषु योऽन्यत्र शक्त्या याचते ॥ ८ ॥ यत्राप्रस्तुतवृत्तांतव
र्णनेन प्रस्तुतावगतिपर्यवसायि तदप्रस्तुतप्रशंसालंकारः अप्रस्तुतवृत्तांतवर्णनेन तु
प्रस्तुतावगतिश्च प्रस्तुताप्रस्तुतसंबंधे सति भवति संबंधश्च सारूप्यं सामान्यविशे
षभावः कार्यकारणभावो वा संभवति तत्र सामान्यविशेषभावे सामान्याद्विशे
षस्य विशेषात्सामान्यस्यावगतौ द्वैविध्यं कार्यकारणभावेऽपि कार्यात्कारणस्य कारणा
त्कार्यस्यावगतौ द्वैविध्यं सारूप्ये त्वेको भेद इत्यस्याः पंचप्रकाराः यदाहुः कार्ये
निमित्ते सामान्ये विशेषे प्रस्तुते सति तदन्यस्य वचस्तुल्ये तुल्यस्येति च पंचधेति त
त्र सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणं एकः कृतीति अत्राप्रस्तुतस्य चातकस्य
प्रशंसा प्रशंसनीयत्वेन प्रस्तुते तत्सरूपे तदुपायाचनानिवृत्तमानिनि पर्यवस्यति

कु॰ ने॰ २८

यथा वा आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वा मत्ते
भकुंभतटपाटनलंपटस्य नादं करिष्यति कथं हरिणाधिपस्य अत्र शुनकस्यानिंदानि
दनीयत्वेन प्रस्तुतेन तादृग्रूपेण कृत्रिमवेषव्यवहारमात्रेणाविद्वन्मात्रमभिनयति वैयेयप
र्यवस्यति यथा वा अंतश्छिद्राणि भूयांसि कंटका बहवो बहिः कथं कमलनालस्य माभू
वन्भंगुरा गुणाः अत्र कमलनालस्योत्कीर्तनेन तत्तद्रूपे वहिः खलेषु जाग्रत्सु भ्रातृपु
त्रादिभिरंतःकलहं कुर्वाणेषु पुरुषेषु पर्यवस्यति एवं लक्ष्यलक्षणयोः अप्रशंसा प्राहुः स्तुति
निंदास्वरूपव्याख्यानमसाधारणकीर्तनमात्रपरो द्रष्टव्यः सामान्यनिबंधना यथा विधा
य वैरं सामर्षे नरोऽरौ य उदासते निक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् अत्र प्रा
ग्बद्धामर्षे शिशुपाले रुक्मिणीहरणादिना वैरं दृढीकृतवता केशवेन तस्मिन्नुदासितु
मयुक्तमिति विशेषवक्तव्ये प्रस्तुते तत्प्रत्यायनार्थं सामान्यमभिहितं यथा वा सो
ढाहं स्वर्गिरिपूणामुच्चावचमिदं त्वया परोक्षमिति कोऽप्यस्ति परीक्षानिकषोपलः अत्र
यदि त्वं प्रत्यक्षरूपपरोक्षेऽपि मम हितमाचरसि तदा त्वमुत्तमः सुहृदिति विशेषवक्तव्य

तेन प्रस्तुते सामान्यमभिहिते विशेषनिबंधनाय यथा अंकारोपितमृगश्चंद्रमामृ
गलांछनः केसरीनिष्ठुरक्षिप्तमृगयूथो मृगाधिपः अत्र क्लेसेप्रतिबलमद्धवाको
मार्दवदूषणपरे स्वे प्रस्तावानुसारेण क्रूर एव ख्यातिभाग्भवति न तु मृदुरिति
सामान्येन वक्तव्ये तत्समर्थनार्थमप्रस्तुतो विशेषोभिहितः एवं हृदकथादि
ष्वसामान्यतः किंचिदर्थं प्रस्तुत्य तद्विवरणार्थं प्रस्तुतकथाविशेषोदाहरणेष्विय
मेवाप्रस्तुतप्रशंसा द्रष्टव्या कारणनिबंधनाय यथा हृतसारमिवेंदुमंडलं दमयंती
वदनाय वेधसा कृतमध्यबिले विलोक्यते धृतगम्भीरखनीखनीलिम अत्राप्रा
करणिकेंदुमंडलगतत्योत्प्रेक्षमाणेन दमयंतीवदननिर्माणार्थं सारापहरणैक
रणेननतत्कार्यरूपेण वर्णनीयेन तयाप्रस्तुतो दमयंतीवदनगतो लोकोत्तरसौंदर्य
विशेषः प्रतीयते यथा वा मदीयवरदराजस्तवे आश्रित्य नूनममृतद्युतयः पदं
ते देहक्षयोपनतदिव्यपदाभिमुख्याः लावण्यपुण्यनिचयं सुहृदि त्वदास्ये विन्यस्य
यांति मिहिरं प्रतिमासभिन्नाः अत्राप्राकरणिकचंद्रगततयोत्प्रेक्ष्यमाणेन लावण्य

तो

पुण्यनिचयविन्यासेन कारकैर्न तत्कार्यमनेन कोटिचंद्रलावण्यप्रक्षालितमनन्यमु
खसाधारणं भगवन्मुखे वर्णनीयतया प्रस्तुते तथा हि चंद्रलावण्यं च लिंगाद्वृद्धि
क्षयाभ्यां भेदाध्यवसायाद्वा प्रतिमासभिन्नत्वेन वर्णितः तेनातीतानागतसंख्यानेनेतत्को
टयः इति लक्षे कालस्यानादित्वात् सर्वेषां वर्तमानाकाशस्याश्रयणं श्लेषमहिम्ना
भगवच्चरणसमाश्रयणात्वेनाध्यवसितं भगवच्चरणप्रपन्नानां च देहत्यागे परस्थितो
परमपदप्राप्त्याभिमुख्यं तदानीमेव स्वस्वदेहं हित्वर्गस्वकीयसुकृततेजोमतिवेशनेन त
तः सूर्यमंडलप्राप्तिश्चैषेन तत्सर्वेश्रुतिसिद्धमिति तिलटगुरोर्येन तेषां देहत्यागकाल
स्यामावास्यारूपस्योपस्थितौ सूर्यमंडलप्राप्तेः प्रागुपसिद्धं पुण्यत्वेन निरूपितस्य
लावण्यस्य प्रदानं निमित्तीकृतं तस्य चंद्रस्य दशास्वरूपोपचारितं सोदाहरति भगव
न्मुखेन्यस्मन्मुत्प्रेक्षितम् यद्यपि स्वदेहदक्षेत्वे सति तावत्तल्लावण्यसंक्रमणं भव
ति तथाप्यत्र स्वदेहदानस्यैकवचनेन भगवन्मुखमेव चंद्रस्य स्वदेहदानेन मुखांतराणि
चंद्रसादृश्यपात्राणि यस्मात्तस्य दानीति भगवन्मुखस्येतरमुखेभ्यो व्यतिरेकोपि व्यंजितः ॥

सुप्य८

ततस्तस्मिन्नेव सर्वेषां चंद्राणां स्वस्वयावल्लावण्यैर्विन्यासेनोल्लेखितेन प्रास्वणीतः
प्रस्तुतोर्थः स्पष्टमेव प्रतीयते यद्यपिस्कंतो सूर्यमंडलप्राप्त्यनंतरभाविविरंचायना
तिक्रमणानंतरमेव सहस्रस्कंतसंक्रमणं श्रूयते तथापि प्रासीरकथासेंतस्पर्थे
वृषणाग्नागमावःस्थापिताः इतितदनुसारेण विन्यस्यामिहिरं यातीसकमम् कार्येनि
वेयनायथा नाथत्वदंघ्रिनखयावन तोयुलग्नाल्लंकोत्तिलेपकणिकाजलधिंप्र
विष्टाः तावत्तस्यमथनेन घनीभवंत्यो नूनं समुद्रनवनीतपदं प्रपन्नाः अत्रभग
वत्पदांबुजस्य लनतो यदृणार्यां दिव्यसरिति अलक्तकरसादिविलग्नानां तयासह
समुद्रे प्रविष्टानां नखकांतिलेशकणिकानां परिणामतया संभाव्यमानेन समुद्र
नवनीतपदवाच्येन चंद्रेण कार्येणात्र नखकांत्युत्कर्षः प्रतीयते यथा वा अस्यामेवे
द्गतिसौकुमार्यामधुनाद्वेसस्पर्गवैरलेमेलापोयदिमाव्यतो परस्तैर्वीवंयमनेव
तम् अंगानामसकृत्तरतायदि दृष्टमायैवसामालतीकोतिश्वेतकमलाकिमत्रवङ्
नाकाषायमालंबतामम् अत्रनायिकांगत्यादिवर्णनीयत्वे प्रस्तुते शुद्धेसादिग्गति

६१

ऊ.नं. ३०
30

गर्वं दंतत्वादिदूषणानि विशेषेण संभाव्यमानानि कार्याणि क्रमेणाभिहितानि यतानि
वक्ष्यमाणोदाहरणेऽवनवमस्तु कार्याणि किंतु न तत्र निर्दिष्टतया कार्याणि लज्जातिरस्कारायदि
चैतस्मिन्स्यादस्माये पर्वतराजपुत्र्याः नेकेपापाणि प्रसमीक्ष्य मुखं बालस्निग्धतया विपितो
लेवमर्थः इत्याद्युदाहरणेतरे तथैव स्पष्टं अंगानामकठोरत्वेनिर्गतीयपादेत्व
णनीयाङ्गसौकुमार्यातिशयनिरीक्षणकार्यत्वमपि नार्थोद्देश्यमालतीकठोरत्वेवि
वक्षिते प्रतियोगिविशेषणे न कठोरत्वस्य तदकार्यत्वात् किंतु तदुद्दैर्घ्यकर्कशत्वमपि त्व कठोरत्वतु विरे द कार्यत्वम
दङ्गमार्दवेऽदृष्टस्तु यथोदाहरणे तथैव स्पष्टं अन्यस्य कार्यत्वेऽसंभवदुष्टःकार्यत्वेपिकार्य
निबंधनत्वेनदृष्टीयतइतितादृशान्यपि कार्याणि निबंधनाप्रस्तुतप्रशंसायामुदाहरणा
निप्राचीनैः वस्तुतस्तु तदतिरेकेपि न दोषः नयप्रस्तुतप्रशंसायां प्रस्तुताप्रस्तुतयोः
पंचविधएव संबंधइति नियंतु शक्यते संबंधांतरेऽपि तद्दर्शनात् यथा तापत्रयौ
षधवारस्य तव स्मितस्य निःश्वासमंदमत्ता वितुषीकृतस्य यत्केऽकारचयाऽवविश
कीर्णांजैवातृकस्य किरणाजगतिभ्रमंति अत्र यप्रस्तुतानां चंद्रकिरणानां भाव ३

न्मेदस्मितत्वत्पदद्विषो यथ यथान्यविशेषकडंकारचयतोन्मेषेण न भगवन्मेदस्मितस्यात
त्सारतात्वत्पः कोप्युत्कर्षः प्रतीयते न च यथान्यकडंकारचययोः कार्यकारणभावादि सं
बंधोस्ति अतः सदोत्पत्त्यादिकमपि संबंधोतरमाश्रयणीयं एवमुपमानोपमेययोर्भा
कवि० वमाश्रित्य तत्र कल्पितकार्यकारणभावनिबंधनेप्रस्तुतप्रशंसा दर्शिता ततोन्य
त्रापि दृश्यते यथा कालिंदि ब्रूहि कुंभोद्भव जलधिरहं नाम गृह्णासि कस्माच्छत्रोर्मे
नर्मदाहं त्वमपि वदसि मे नाम कस्मात्सपत्न्याः मालिन्यं तर्हि कस्मादनुभवसि मि
लत्कज्जलैर्मालवीनां नेत्राम्भोभिः किमासां समभवदुपनतः कुंतलक्षोणिपालः १
अत्र किमासां समजनीति मालवीनां तथा रोदनस्य निमित्ते पृष्टे तत्प्रियमारणरूप
निमित्तमनाख्याय कुपितः कुंतलक्षोणिपाल इति तत्कारणमभिहितमिति कारण
निबंधना मालवान्प्रति प्रस्थिते न कुंतलेश्वरेण किं ते निर्जिता इति पृष्टे तद्ध्याने तत् स्पृष्टेण
भावि जलनिधिनर्मदाप्रश्नोत्तररूपकार्यमभिहितमित्यत्रैव कार्यनिबंधनापि
द्विविधाप्यप्रस्तुतप्रशंसाऽसौ मार्यमतिभेदः प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुतांकुरः किं

कारणनिबन्धनायां कार्यनिबन्धनायां

ऊने. भङ्गः सत्यां मालत्यां केतक्याः कोटके हृया ॥ २२ ॥ अत्र प्रस्तुतेन वर्ण्यमानेनाभिमतमप्रस्
२२ तुतं द्योत्यते तेन तत्र प्रस्तुताङ्कुरोलङ्कारः । उत्तराङ्गस्यापहरणं अत्र प्रियतमेन साकमनुया
31 नेच्छन्ती काचिद्भंगप्रत्यवमार्ष्टीति वाच्यार्थस्य प्रस्तुतत्वे नवानामेति ब्रीयाम
त्रेण नवाच्यासंभवात्प्रस्तुतमेव वाच्यमिदं मप्रस्तुतावगतये निर्दिष्टमिति
वाच्ये सौगन्ध्यादिना भृङ्गाद्यावश्यामेत्रेणास्य लोके दर्शनात् यथा कस्त्वं भोः कथय
प्राकोट कं= मि दैवहतकं मां विद्धि साक्रोटकं वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते दितं=
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते नच्छायापि परोपकारकरणी मार्गस्थि
तस्यापि मे इत्यत्र चेतनाचेतनप्रश्नोत्तरवत्तिर्यगामंत्रणास्यात्पत्तमसंभावितत्वा
भावात् एवं प्रस्तुतेन वाच्येन भृंगोपालंभरूपेण पत्याकुलवधाः सौंदर्याभिमा
नपराङ्गिन्याः क्रूरजनपरिहृति दुःप्रापायां परवनितायां क्लिष्टस्य वेश्यापहरणं संक
ल्पद्गुरात्मदायां वेश्यायां वा कण्टकसंकुल केतकीकल्यायां प्रवर्तमाने प्रियतमप्र
सुपालंभो द्योत्यते यथा वा अन्यास्ता तावदुपमर्दसहा हंसभृंगलोलविनोदयमनः २२

सुमनोलतासु वालासु अजातरजसं कलिकामकाले व्यर्थं कदर्थयसि किं नवमल्लिका
याः अत्राप्युद्यानमध्ये चरंतं भृंगं प्रत्यप्रस्तुतालंभः इति वाच्यार्थस्यापि प्रस्तुतत्वमू
द्देव प्रौढांगनासु विद्यमानासु बालिकां रतये क्लेशयंति कामिनि स्फुट एवेति कस्याश्चि
द्धितस्यायाववचनमिति ते प्रस्तुपालंभो द्योत्यते यथा वा कोपाद्देहमियद्यातिनलि
नीकांदे वचेत्र दूतेयते चूतलतानवं किसलयं पुंस्कोकिलास्वादितं इत्याकर्ण्येपमि
थः सखीजनवचः साटीहिंकायाश्चेटे चेलांतेन तिरोदधे स्तनतटं बिंबाधरं पाणिना
अत्रैयमिति नलिनीमात्री विशेषनिर्देशेन दीर्घिकातटचूतपाले न च वाच्यार्थस्य प्र
स्तुतत्वं स्पष्टं प्रस्तुतांतरद्योतनं च स्वयमेव कविना विस्फुटमुत्तरार्द्धे अत्रायोदाह
रणयोरन्यापदेशध्वनिमाहुर्लोचनकारः अप्रस्तुतप्रशंसायां वाच्यार्थोऽप्रस्तुत
त्वात् वर्णनीयः इति तत्राभिधायामपर्यवसितायां तेन प्रस्तुतार्थव्यक्तिरलंकारः सु
हृत्तु वाच्यस्याप्रस्तुतत्वेन तत्राभिधायापर्यवसितायामर्थे सौंदर्यबले नाभिमता
र्थव्यक्ति ध्वनिरेवेति वस्तुतस्त्वयमप्यलंकार एव न तु ध्वनिरिति व्यवस्थापितं तेवि

अ॰ चं॰
३२

त्रमीमांसायां तृतीयोदाहरणस्यालंकारत्वेन कस्यापि विवादः उक्तं हि ध्वनिकृता ॰
शब्दार्थशक्त्या क्षिप्तोपि व्यङ्ग्योर्थः कविना पुनः यत्राविष्क्रियते स्वोक्त्या सान्यैवालंकृ
तिर्ध्वनेरिति एतानि मादृश्यानि निबेयमान्युदाहरणानि सर्वथा तत्र निबध्यमानान्यपि क
थंचिद्वाच्यव्यंग्ययोः प्रस्तुतत्वोपलंभनेनोदाहरणीयानीति दिङ्मात्रमुदाहृ
यते रात्रिः शिवा काचन सन्निधत्ते विलोचने जागृतमप्रमत्ते समानेयमोप्यवयोः
सकाशे सखा भविष्यत्यचिरेण कश्चित् अत्र शिवसाहचर्यमिव तदेकदेशतया
तेहाध्यललाटलोचनमपि शिवरात्रिमाहात्म्यप्रयोजकत्वेन वर्णनीयमिति ते
नुखेन कृतं शिवसाहचर्यगमकं यथा वा वहन्ती सिंदूरं प्रबलकवरीभारतिमि
रत्विषां वैरे दैवैदीकृतमिव नवीनार्ककिरणं तनोतु क्षेमं नस्तव वदनसौंदर्यलक्ष्मी
परीवाहः स्रोतः सरणिरिव सीमंतसरणिः अत्र वर्णनीयत्वेन प्रस्तुतायाः सीमंतस
रणेर्वदनसौंदर्यपरीवाहत्वोत्प्रेक्षणेन परीस्फुरति तडाकवत्परीवाहकारणीभूता
सस्यानेत्रमातीवदनसौंदर्यसमृद्धिः प्रतीयते सापि वर्णनीयत्वेन प्रस्तुतैव य ३२

श्लोके सत्वेति
पदवाच्यम्
एकदेशि =
एकदेश्येकदेशि
भावसंबन्धः
परीवाहः स्त्रूता
स्रोतसः सर
णिरिव परी
वाहो जलनि
र्गममार्गः

एकदेशात्
ललाटलोचन

यथा वा अंगासंगि मृणालकांडमयते भृंगावलीनां रुचिं नासामौक्तिकमिंद्रनीलस
रणिं श्वासानिले गाहते दंतेयं हिमवालुकापिककयोर्यत्ते दशां दीपतां तन्माथ्यःप
वे तितो बुँकरनलेथारांसुसंलीयते अत्र नायिकाया विरहासहत्वातिशयप्रकटनाय
संतापवत्त्वकार्याणि मृणालमालिन्यादीन्यपि वर्णनीयत्वेन विवक्षितानीति तन्मु
खेन संतापो वगम्यः यत्र कार्यमुखेन कारणस्यावगतिरपि श्लोके निबद्धा न तत्राय
मलंकारः किंत्वनुमानमेव यथा वा परिम्लानं पीनस्तनजघनसंगादुभयतस्त
नोर्मध्यस्यांतः परिमिलनमप्राप्य हरितं इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशांगाः संतापं वदति नलिनीपत्रशयनं न च तत्र प्रस्तुतकार्याभिधानमुखे
न कारणस्य गम्यत्वमपि प्रस्तुतो ऽत्र विषयश्चेत्किंतर्हि पर्यायोक्तमित्याकांक्षाया
माह पर्यायोक्तेंतु गम्यस्यैव वाभंग्यंतराश्रये नमस्तु सैव कृतीयेन नु यथा राकृवच्छक्यो
ह्य यदेवगम्यं विवक्षितं तन्न सैव भंग्यंतरेण विवक्षितं तत्पादपि चारुतरेणा केन विक्षू
पांतरेणाभिधानं पर्यायोक्तमुत्तरार्द्धमुदाहरणं अत्र भगवान् वासुदेवः स्वामाया

उ॰ने॰ २२

रागाद्रूपेणागम्यः रागद्वेषसङ्कल्पवैषम्यकारकत्वेन द्रूपांतरेणासम्यग्वाभिहितः यथावा
लोके पश्यति यस्त्वोह्रिः सम्यक्स्वाह्रिं न पश्यति नाभ्यामप्यपरिच्छेद्याविद्याविष्णुरोस्त
व अत्र गौतमः पतेजलिस्त्रस्तामाधारणाद्रूपाभ्यागम्योद्रूपांतरेणाभिहितो यथावा
निवेघतांहेतस्समापयेतौ गिरीशकोशाम्बादिमाभिमाने पादोकियदूराममौ प्रथा
से निधिन्नतेनुकुटयेमनले अत्र कियद्दूरे जिगमिषेति गाम्यग्वार्थो द्रूपांतरे
णाभिहितः यथावा देवैर्वेदैर्जलधिप्रार्थितदेवतासार्वभौमव्यासप्रसूभुवनवि
दितायस्यवाहायिवाहाः भूषायेदोभुवनमयं यद्व्यक्तुश्चवादी प्रान्दीपालाः
प्रातमरवमुखाग्रेदनदुमेनोभः अत्र यस्य वेदा वाहा भुजगा भूषणानीत्यादि
तत्तद्वाक्यार्थमवस्थितौ वेदनाधाकारेणावगम्या पदवेदादयो व्यासप्रमुख
विनेयस्त्वाधाकारेणाभिहिताः पंचदेवतासार्वभौम तस्कलीकरणाय विप्रो
षणविप्रोच्छभावोव्यन्यासेन प्रतिपादितः अलंकारसर्वस्वकृतापि पर्यायोक्तस्य
संप्रदायानुगतमिदमेव लक्षणमंगीकृतं गम्यस्यापि भंग्यंतरेणाभिधाने पर्या २२

योक्तमिति चक्राभिघातप्रसभाज्ञयैव चकारयो राहुवधूजनस्य आलिंगनोद्दाम
विलासवंध्यं रतोत्सवं चुम्बनमात्रशेषमिति प्राचीनमुदाहरणं तत्र यथा योजितं तं
तदेवाह राहुवधूगतेन विशिष्टेन रतोत्सवेन राहुशिरश्छेदः कारणरूपो गम्यते इति
एवं च गम्यस्यैवाभिधानमिति लक्षणस्यानुपपत्तिमाशंक्य यद्गम्यं तस्यैवाभिधाना
योगात् कार्यादिद्वारेणैवाभिधाने लक्षणं विवक्षितमिति लक्षणमपि क्लिष्टगत्या यो
जितम् लोचनकृतोऽपि पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते इति इदमेव लक्षण
मंगीकृत्य तदुदाहरणे च कार्यरूपाक्षाभिहितेन कारणं व्यंग्यं सम्यक् प्रदर्शितं तत्र
लक्षणं लक्ष्ये च क्लिष्टगत्या योजितं तदेव वा यदन्येन प्रकारेण व्यंग्येनोपलक्षि
तं सम्यगभिधीयते तत्पर्यायेन प्रकारान्तरेण व्यंग्येनोपलक्षितमुक्तमिति सर्वे वै य
लैकथाः किमर्थमिति निर्विमर्शं दर्शितानि दृष्टिगम्यस्यैव रूपान्तरेणाभिधाने न च उदा
हरणानि चक्राभिघातप्रसभाज्ञयैवेति प्राचीनोदाहरणमपि स्वरूपेण गम्यस्य भ
गवतो रूपान्तरेणाभिधानमस्त्वात्मयोजमेव यत्तु तत्र राहुशिरश्छेदावगमने तथा

कु. नं.
३५

युक्तरीत्या प्रस्तुतोऽङ्कुर एवं ॥ प्रस्तुतेन च राहोः शिरोमात्रावशेषेण लिंगेन वध्यता या
पादनरूपे वाच्ये सति भगवतोऽन्यथारोपणाज्ञ्यादित्तेन भगवत्स्वरूपेणावगमने पर्या
योक्तस्य विषयः पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनं यामि चूतलतां द्रष्टुं यु
वाभ्यामास्यतामिह ६५ अत्र नायिकां नायकेन संगमय्य चूतलतादर्शनव्याजेन नि
र्गच्छन्त्याः सख्या तत्साहचर्यसंपादनरूपेष्टसंपादनं रूपेष्टसंपादनं पर्यायोक्तम्
यथा वा देहि मत्कंदुकं राधे परिधाननिगूहितं इति विस्रंसयन् नीवीं तस्याः कृष्णो मु
देऽस्तु वः सर्वत्र परेष्टसाधनम् अत्र कंदुकमन्वेषयन्नात्मनो नीवीविस्रंसनव्या
जेन स्वेष्टसाधनमिति भेदः उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिंदयोः कः स्वर्धु
नि विवेकस्ते पापिनो नयसे दिवं साधु दूति पुनः साधु कर्तव्यं किमतः परं यन्मदर्थे
विलूनासि दंतैरपि नखैरपि ६६ निंदया स्तुतिः स्तुत्या निंदा या वाच्यावगमने व्याज
स्तुतिः कः स्वर्धुनीत्युदाहरणे विवेको नास्तीति निंदाव्याजेन गंगायाः स्तुतिः सर्वोत्तम
हापातकादिकृतवतोऽपि स्वर्गं नयतीति व्याजरूपनिंदया नत्वप्रभावातिशयस्तुतिः ३५

साधुदूतीत्युदाहरणे मदर्थं महांतं क्लेशमनुभूतवत्यसि इति व्याजरूपया स्तुत्या मद
र्थं न गतासि किंतु रंतुमेव गतासीत्युत्तयिकृतो दूतिकांथ मे विरुद्धकारिणीमिति
निंदागम्यते यथा वा कस्ते शौर्यमदो योद्धुं त्वय्येके सप्तिमास्थिते सप्तसप्तिसमाहू
ताभवेति परिपंथिनः यथा वा अर्द्धं दानववैरिणा गिरिजयाप्यर्द्धं शिवस्याहृतम्
देवेत्थं जगतीतले स्मरहराभावे समुन्मीलति गंगा सागरमंबरं शशिकला नागाधि
पः स्मातलं सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां च भिक्षाटनं अत्राद्योदाहरणे स्तुस
न्निपदगतश्लेषमूलनिंदाव्याजेन स्तुतिर्व्यज्यते द्वितीयोदाहरणे सर्वज्ञः सर्वेश्वरोसी
तिराज्ञः स्तुत्या व्याजरूपया मदीयवैदुष्यादिदारिद्र्यादिसर्वं जानन्नपि बहुदानेन र
दितुं शक्तोपि मह्यं किमपि न ददासीति निंदाव्यज्यते सर्वमिदं निंदास्तुत्योरेकवि
षयत्वे उदाहरणे भिन्नविषयत्वेन निंदया स्तुत्यभिव्यक्तिः यथा कस्त्वं वानर राम
राजभवने लेखार्थसंवाहको यातः कुत्र पुरागतः स हनुमान्निर्दग्धलंकापुरः ब
द्धो राक्षससूनुनेति कपिभिः संताडितस्तर्जितः सव्रीडात्तपराभवो वनमृगः कुत्रेति न

कुव॰ ३५ ज्ञायते अत्र हनुमन्निंद्यादितरवानरस्तुत्याभिव्यक्तिः स्तुत्यानिंदाभिव्यक्तिर्यथा
यद्वक्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा नैषां गर्ववचः शृणोषि न च तान्प्रत्या
शया धावसि। काले बालतृणानि खादसि सुखं निद्रासि निद्रागमे तन्मे ब्रूहि कुरंग
33 कुत्र भवता किं नाम तप्तं तपः॥ अत्र हरिणस्तुत्या राजसेवाविनिर्विण्णस्यात्मनो निंदाभि
व्यज्यते अयमप्रस्तुतप्रशंसाविषय इत्यलंकारसर्वस्वकारः तेनेदृशास्थले निबं सर्वस्वकारेण
धनाप्रस्तुतप्रशंसोदाहरणान्तरत्वेनैव धर्मिणा निरूप्यते। धन्याः खलु वने वाताः का यथा सन्नयः
ह्लारस्पर्शशीतलाः। राममिंदीवरश्यामं ये स्पृशंत्यनिवारिताः॥ अत्र वाता धन्या इत्य
प्रस्तुतादर्थादहमधन्य इति वैधर्म्येण प्रस्तुतोर्थः प्रतीयत इति सुधीयादिते इय
सारूप्य = मेवाप्रस्तुतप्रशंसा न कार्यकारणादिनिबंधनेति। ईदृशं यदाह अप्रस्तुतप्रशं
सा स्यादप्रकांडे तु या स्तुतिः। सुखं जीवंति हरिणा वनेष्वपरसेविनः। अन्यैरयत्न
सुलभैर्जलदर्भांकुरादिभिः॥ सेयमप्रस्तुते वीत्र मृगवृत्तिः प्रशस्यते राजानुव
र्तनक्लेशनिर्विण्णेन मनस्विना इति वस्तुतस्त्वत्र व्याजस्तुतिरित्येव युक्तं स्तुत्या ३५

मतद्वयेऽस्मिन् सबीजं दर्शयति =

वैचित्र्यमस्या विषयस्यालंबनभूतो विशेषवत्स्य

निंदाभिव्यक्तिरित्यप्रस्तुतप्रशंसातो वैचित्र्यं विषयविशेषसद्भावात् । अन्यथाप्र
सिद्धव्याजस्तुत्युदाहरणेषु प्रस्तुताभ्यां निंदास्तुतिभ्यां प्रस्तुते स्तुतिनिंदे गम्येते इत्ये
तावता व्याजस्तुतिमात्रमप्रस्तुतप्रशंसास्यात् एवं चानेन प्रक्रियाबाधः यत्रान्यगतास्तुति
विवक्षयान्यस्य स्तुतिः क्रियते तत्रापि व्याजस्तुतिरेव अन्यत्र स्तुतिव्याजेन तदन्यस्य
स्तुतिरित्यर्थावगमसद्भावात् यथा पिकवरिणि कुनामकीयन्निरीक्ष नभिया
नमसावकरोत्तपः तरुणीयेनतवाधरपाटले दश्यति बिंबफलं शुकपावकः अ
मुकपावकस्तुत्या नायिकायाः सौभाग्यातिशयस्तुतिरवगम्यते निंदया निंदयाव्य
क्तिर्व्याजनिंदेति गीयते विधे स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः ५ अत्र हरनि
दया विषमविपाके संसारे प्रवर्तयतो विधेर्निंदाभिव्यक्तिर्व्याजनिंदा यथा वा वि
धिरेव विशेषगर्हणीयः करट त्वं रटकलत्रापराधः सहकारतरौ च कारयत्ते स
हवासं सरसेन कोकिलेन अन्यस्तुत्यान्यस्तुत्यभिव्यक्तिरिति पंचमप्रकारव्याजस्तु
तिप्रतिद्वंद्वीभूतेयं व्याजनिंदा ननु यत्रान्यस्तुत्यान्यस्तुतिरन्यनिंदयान्यनिंदा वे

आद्यप्रकारद्वये स्तुतिनिन्दयोः समानाभिन्नविषयत्वाभ्यां
प्रत्येकं द्वैविध्ये चत्वारो भेदाः पञ्चमस्तु भिन्नविषयक
स्तुतिरूप एव

ऊ.नं.
३९
36

प्रतीयते तत्र व्याजस्तुतिव्याजनिंदालंकारयोरभ्युपगमे स्तुतिनिंदारूपाप्रस्तुतप्रशं-
सोदाहरणेषु प्रस्तुतप्रशंसा न वक्तव्या तेषामपि व्याजस्तुतिनिंदाभ्यामंगीकारसंभवा-
दिति चेत् उच्यते यत्राप्रस्तुतवृत्तांतात् स्तुतिनिंदारूपान्न तत्स्वरूपः प्रस्तुतवृत्तांतः प्र-
तीयते यथा छिद्राणि भूयांसि कंटकाबहवोबहिरित्यादौ तत्र लज्जावकाशसारूप्य-
निबंधनाप्रस्तुतप्रशंसा· तत्रापि वर्तमानानां निवारयितुं प्राकाश्यान्यस्तुत्यान्यस्तुति-
रन्यनिंदयान्यनिंदेत्येवं व्याजस्तुतिव्याजनिंदयोरपि संभवतस्त्वेकामंतेत्राभिभवे
नानात्वस्यापरित्यागः यद्यपि विधिरेव विशेषणग्रहणो यत्रेति श्लोके विधिनिंदया
तन्मूलकाकानिंदया वा विशेषणत्वस्य प्रमोल्लेन च विद्वन्मतया स्थापितस्य मूर्ख-
स्य च निंदापि प्रतीयत इति तत्र सारूप्यनिबंधनाप्रस्तुतप्रशंसाप्यस्ति तथापि से-
व व्याजनिंदामूलेति प्रथमोपस्थितापि सापि तद्दुर्बला एवं च व्याजनिंदामूलिका
व्याजनिंदारूपेयमप्रस्तुतप्रशंसेति चमत्कारातिशयः एवमेव व्याजस्तुतिमूल-
कव्याजस्तुतिरूपाप्यप्रस्तुतप्रशंसा दृश्यते यथा लावण्यद्रविणव्ययो न गणितः ३९

ऽपि श्रीमद्दानजितः स्वच्छंदं वैरतोऽजनस्य हृदये चिंताज्वरो निर्मितः । एषापि स्वगु
णानुरूपरमणाभावाद्वराकी हता कोऽर्थश्चेतसि वेधसा विनिहितस्तन्वीमिमां त
न्वता ॥ अत्राप्रस्तुतायाः ललनायाः स्तुतिनिंदाव्याजेन तन्निंदाव्याजेन च तत्सौंदर्यप्र
शंसा प्रशंसनीयत्वेन कविविवक्षितायाः स्वकवितायाः स्तुतिनिंदाव्याजेन त॰
न्निंदाव्याजेन च प्रशंसायां चमत्कारातिशयप्रशंसायां पर्यवस्यति ॥ अस्य श्लोक॰
स्य वाच्यार्थविषये यद्यपि नाम्येन सम्मेजस्यं न तीमे विकल्पा वीतरागस्य चित्ते॰
कल्पयितुं शक्यन्ते स्मरानलगुणत्वाद्वीतरागहृदयस्यैवंविधविषये प्रवृत्तेश्च
नापि रागिणः इति युज्यते तदीयविकल्पश्च वराकीति कृपणानालिंगितस्य हृते
स्य मंगलोपहृतस्य च वचसोऽनुचितत्वात् तुल्यरमणाभावादित्यस्यांशस्यानुचि
तत्वाच्च सामानितदनुरूपतासंभावनायाः सत्त्वात् तुल्यरमणाभावादित्यस्या
स्यैतानुचितत्वाच्च सात्मानितदनुरूपतासंभावनायाः सत्त्वात् रागित्वेऽपि प्र
प्रायतामप्यास्तथापि विवक्षितप्रस्तुतार्थपरतायां न किंचिदसामंजस्यम् ॥ अत

एवास्य श्लोकस्याप्रस्तुतप्रशंसापरत्वमुक्तं प्राचीनैः वाच्यांशे भवेदप्रस्तुतप्रशं
अ॰ चं॰ सोपपत्तेरिति आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् चंद्र संदर्शयात्मान
३० मथवास्ति प्रियामुखं ६८ अत्र प्रार्थितस्य चंद्रसंदर्शनस्य प्रियामुखसत्त्वेन कैमर्थ्यविचा
37 रणाद्व्यर्थत्वमित्यादि सूचितः प्रतिषेध आक्षेपः यथा वा साहित्यदर्पणे ... मथनो
ऽर्थं कर्णामृतं रक्षत हे कवींद्राः यत्नस्यैतस्याखिलं लुंठनायकाव्यार्थचौराः प्रगुणी
भवंति १ गृह्णंतु सर्वे यदि वा यथेष्टं नास्ति क्षतिः क्वापि कवीश्वराणां रत्नेषु लु
प्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिंधुः २ अत्रापि प्रथमश्लोकेन प्रार्थितस्य
काव्यार्थचौरेभ्यो रक्षणस्य ... लिखितेति ... जालवददस्य
त्वे विचिंत्य प्रतिषेध आक्षेपः निषेधाभासमाक्षेपं बुधाः केचन मन्वते नाहं दू
ती तनोस्तापस्तस्याः कालानलोपमः ६९ केचिदलंकारसर्वस्वकारादयस्त्वमाहुः
न निषेधमात्रमाक्षेपः किंतु यो निषेधो बाधितः सन्नर्थांतरपर्यवसितः किंचित्
विशेषमाक्षिपति स आक्षेपः यथा नाहं दूतीति निषेधो बाधितत्वादाभा ३०

सदृशः संघट्टनकालो वितथैतत्ववचनपरिहारेण यथार्थवादित्वे पर्यवस्यन्निदानी
मेवागत्य नायिकां जीवनीयेति विशेषमाक्षिपति यथा वा नरेन्द्रमौलेन वयं तव संदे
शहारिणः जगत्कुटुंबिनस्ते यन्न मया कश्चिदीक्ष्यते अत्र संदेशहारिणामुक्तौ न व
यं संदेशहारिण इति निषेधोनुपपन्नः संधिकालो वितथैतत्ववचनपरिहारेण
यथार्थवादित्वे पर्यवस्यन् सर्वजगतो पालकस्य तव न कश्चिदपि ग्राह्यभावेना
लोकनीयः किंतु सर्वेपि राजानो मृत्युभावेन संरक्षणीया इति विशेषमाक्षिप
ति आक्षेपान्योवियोग्यकेप्रतिषेधेति रोहिते गच्छगच्छसि चेत्कांत तत्रैव स्याज्जनि
मेम ७० अत्र गच्छेति विधिर्यतः मागा इति निषेधस्तिरोहितः कांतोहे श्यदेशानि
ज जन्मप्रार्थनया स्वमरणसंसूचनेन गमननिषेधो गर्भीकृतः यथा वा न चिरं म
मतापाय तव यात्रा भविष्यति यदि यास्यसि यातव्यमलमाशंकयापि ते अत्रापि
न चिरं मम तापायेति स्वस्यामरणसंसूचनेन गमननिषेधो गर्भितः अथाभासत्वे
विरोधस्य विरोधाभासत्वं दृष्यते विनापि तन्विहारेणाव तोजातवल्हारिणा ७१ अत्रेहा

रहितावपिहारिणौ हरणाविति श्लेषमूलको विरोधाभासः यथा वा प्रतीपभूपै
कु॰नं॰ रिव किं ततो भिया विरुद्धधर्मैरपि भेतृतोज्झिता अमित्रजिन्मित्रजिदोजसा स यद्
३८ विचारदृक्चारदृगप्यवर्तत अत्र विरोधसमाधानोत्प्रेक्षाप्रेरको विरोधाभास इ
३८ ति सर्वस्माद्भेदः विभा विना विनापि स्यात्कारणं कार्यजन्म चेत् अप्यलाक्षारसासिक्तं
रक्तं त्वच्चरणद्वयं ७२ अत्र लाक्षारसासेककारणाभावेपि रक्तिमा कथितः स्वाभा
विकत्वेन विरोधपरिहारः यथा वा अपीतक्षीवकादंबमसंमृष्टामलांबरं अप्रसा
दितसूक्ष्माब्जं जगदासीन्मनोहरम् अत्र पानादिप्रसिद्धहेत्वभावेपि क्षीवत्वादिनि
वर्णप्रान: बद्धं विभाव्यमानं शरत्समयहेतुकत्वेन विरोधपरिहारः यथा वा वरतनुकवरी
विधायिना सुरभिनखेन नरेन्द्रपाणिना अपचितकुसुमापि वल्लरी समजनि
हेतविलीनषट्पदा अत्र वल्ल्याः षट्पदाभावे भृंगालिंगनं निबद्धम् वरतनुकवरी
संक्रान्तसौरभनखपतितत्वसंसर्गरूपहेत्वंतरं विधायकत्वेन दर्शितमिति विरो
धपरिहारः हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता अस्त्रैरतीक्ष्णकठिनैर्जगज्जय ३९

तिरूपमयः ७३ अत्र गजेन्द्रघाये माध्ये हेतूनामसमाणाम समग्रत्वे तीक्ष्णत्वादिगुणैकैक
ल्पम् यथा वा उद्यानमारुतोद्धूताश्चूतचंपकरेणवः उदस्रयंति पांथानामस्पृष्टा
नोपि लोचने अत्र वाष्पोद्गमने हेतूनामसमग्रत्वे स्पर्शनक्रियावैकल्यम् उभावपि प्राधा
न्याविति दंडी व्याजहार यतः प्रथमोदाहरणे मन्मथस्य मदिमातिशय ह्रपो हि तीयो
दाहरणे च मयकोरणानामुद्दीपकत्वातिशयरूपश्च विशेषः स्थापितः अस्माभिस्तु
तीक्ष्णत्वादिवैकल्यमपि कारणविकलत्वरूपमिति विभावना दर्शिता कार्योत्प
त्तिस्तृतीया स्यात्सत्यपि प्रतिबंधके नरेन्द्रानेव ते राजन्दृशत्यसिभुजंगमः ७४ अत्र
नरेन्द्रा विषवैद्याः सर्पदंष्ट्राप्रतिबंधकमंत्रौषधपाणिनः श्लेषेण गृहीता इति सर्प
विषप्रतिबंधके कार्योत्पत्तिः यथा चित्रं तपति राजेन्द्र प्रतापतपनस्तव अनातपत्रमु
त्सृज्य सातपत्रं द्विषज्जनम् अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना शंखाद्वीणा
निनादोयमुदेति महदद्भुतं ७५ अत्र शंखत्वेन कामिनीकंठसंयोनादत्वेन तद्दृष्टि
तेवाध्यवसीयत इति अकारणात्कार्यजन्म विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभाव
ना

अ०ने०
८६

शीतांशुकिरणास्तन्वीं हन्त संतापयन्ति तां ॥ अत्र तापनिवर्त्तकत्वेन ख्याततया ताप
विरुद्धैरिन्दुकिरणैस्तापजननिरुक्ता ॥ यथा वा ॥ उदिते कुमार सूर्ये कुवलयमुकुलसन्निभा
नि नेत्राणि मुकुलीभवन्ति चित्रं पर राजकुमार पाणिपद्मानि ॥ यथा वा अविवेकि
कुचद्वंद्वं हन्त नाम जगत्त्रये ॥ प्रकृतिप्रणयिणोरद्यगोरस्तु तेजनमारणे स्वीयादाहर
णयोः कारणस्य कार्यविरोधित्वे स्वाभाविकं ॥ प्रकृतिप्रणयन रूपागन्तुकगुणप्र
युक्तमिति भेदः कार्यात्कारणजन्मापि दृष्टा काचिद्विभावना ॥ यथा ॥ पयोधिरभवत्
कल्पतरोस्तव ॥ १७ ॥ यथा वा जाता लता हि शैले जातु लतायां न जायते शैलः ॥ संप्रति
तद्विपरीतं कनकलतायां गिरिद्वयं जातं ॥ कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे
हृदि स्नेहदशा यो नाभूत्स्मरदीपे ज्वलत्यपि ॥ १८ ॥ यथा अनुरागवती संध्या दिवसस्तत्पु
रस्सरः अहो दैवगतिश्चित्रा तथापि न समागमः ॥ असंभवोऽर्थनिष्पत्तेरसंभाव्यत्व
वर्णने ॥ को वेद गोपशिशुकः शैलमुत्पाटयेदिति ॥ १९ ॥ यथा वा अयं वारामेको नि
लय इह रत्नाकर इति श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः क एवं जानीते नि

८६

जनरछ्लीकोटरगतं दाणादक्षेनंताम्यलिंमिमकरमापास्यतिमुनिः विरुद्धं भिन्नदेशा
त्वेकार्यहेत्वोरसंगतिः विषंजलधरैः पीतं मूर्छिताः पथिकांगनाः ८६ ययोःकार्य
हेत्वोर्भिन्नदेशत्वे विरुद्धं तयोस्तद्विवर्ण्यमानमसंगत्यलंकारः यथाविषपानमूर्छ
नयोर्भिन्नदेशत्वे यथावा अहोखलभुजंगस्य विपरीतोवधक्रमः अन्यस्यदशति
श्रोत्रमन्यः प्राणैर्वियुज्यते क्वचिदसंगतिसमाधाननिबंधनेन चारुतातिशयः अ
जस्रमारोहसिहरद्दोर्भिर्मकल्पसोपानततिंतदीयाम् आसाद्यसर्वर्षत्वयिकेशुन
र्येस्यानाततवत्वमस्यतामवाप्य विरुद्धमिति विशेषणात्यत्र कार्यहेत्वोर्भिन्नदेशत्वं
नविरुद्धंतत्रनासंगतिः यथा भ्रूचापवल्लींसुमुखीयावन्नयति वक्रतां तावत्कटाक्ष
विशिखैर्भिद्यतेहृदयंमम अन्यत्रकरणीयस्यततोन्यत्रकृतिश्चसा अन्यत्कर्तुंप्र
वृत्तस्यतद्विरुद्धकृतिस्तथा ८७ अपारिजातांवसुधांचिकीर्षन्द्यांतथाकृथाः गोत्रो
द्धारप्रवृत्तोपिगोत्रोद्भेदंपुराकरोः ८८ अत्रकृष्णंप्रतिशक्रस्योपालंभवचनेभुवि
चिकीर्षितयातत्रकरणीयमपारिजातत्वेदिविकृतमित्येकासंगति पुरागोत्रा

इमयंतीमतिहं सोक्तिरत्रचतुर्थपादेनासंगतिसमाधानम्

ति

गोत्रायाः पृथिव्याउद्धारायप्रवृत्तः-

तो गोत्राणांपर्वतानामुद्भेदं दलनम्-

अपगतमरिजातंयस्मास्तां

पारिजाततरुरहितां

जलकणमेवकंकणम् — पत्रपुष्पावल्लीसेपत्रिकारचना —

अ॰ने॰ ४० तिलजलं ५०

याऽऽहारेप्रहृतेनवराहरूपिणातद्विरुद्धं गोत्राणांदलनंखुरक्रुद्धैः कृतमिति १
द्वितीयाद्विविधापीयंश्लेषोऽस्याप्रिता यथावा स्वनवकुङ्कुमविदितमपत्रविलासिनी १
नोभूषामवेदयमिनवाम्बुकनेकवीर तेचेष्टकंकणमयोफपुष्पपत्रवल्लीचोलेन्द्रसिंहति १
लकंकरपल्लवेषु मोदंजगत्त्रयमुवामपनेतमेतदादायरूपमखिलम्बरदेहभाजां १
निःसीमकांतिरसनीरधिनामुनैवमोदंप्रवर्द्धयसिमुग्धविलासिनीनाम् अत्रायोऽ
रोकंकणादीनामनयत्रकरणीयत्वमप्रसिद्धमितिनोपमासंभवति तेनाभावरूपा
न्यत्रकृतिराद्रिथनयतिलदणानुगतिः विषमंवर्णितेयत्रघटनाननुरूपयोः के
यंशिरीषमृदंगीक्वतावन्मदनज्वरः ८ अत्रातिमृदुत्वेनातिदुःसहत्वेन चाननुरूप
योरंगनामदनज्वरयोर्घटना यथावा अभिलषसियदीन्दोवक्त्रलक्ष्मीमृगाक्ष्याः
पुनरपिसकृदब्धौमज्जसंक्षालयांकं सुविमलमथबिंबंपारिजातप्रसूनैः सुरभय ७०
वदनोचेत्तेकनत्वाम्बुंवेक्क एवंत्ववक्त्रसमीघटना अत्रचेन्दुवदनलक्ष्म्योःखवि
षयांताकिनाघटनेतिभेदः विरूपकार्यस्योत्पत्तिरपरंविषमंमतम् कीर्तिप्रसू

पत्रिकारचना

देहधारिणाम् —

८।४

का

नेयवलं यथा मातवकुलाणिका ॥ ८८ ॥ अत्र कारणगुणप्रक्रमविरुद्धाख्यामान् एवलोत्प
त्तिः कार्यकारणयोर्निर्वर्त्यनिर्वर्तकत्वेपं चमीविभावना विलक्षणगुणमालिनिवत्व
विषमइतिभेदः अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात् भक्ष्याशयाहिमंजूषां
दृष्ट्वाखुस्तेन भक्षितः ८९ इष्टार्थमुद्दिश्य किंचित्कर्मारब्धवतस्तु लोन केवलमिष्टस्या
नवाप्तिः किंतु अनिष्टस्यापि प्रतिलंभश्च ईदृशम् यथा भक्ष्यप्रेप्सयाहिपे
टिकांदृष्ट्वा प्रविश्य मूषकस्य न केवलं भक्ष्यालाभः किंतु स्वदेहनिर्यातिः य
थावा गोपालइतिकसतत्वं प्रभुरलीरवोक्ष्या प्रितोमानं तन्नदोरमयस्तलभ्यंतवयात्र
तम् ॥ ९० ॥ गुरणर्थोवाभिनुपेक्षार्थसमुद्यमादिष्टनवाप्तावनिष्टप्रतिलंभेतोदाहरण
अनर्थानिष्टपरिहारहेतोरर्थं समुद्यमात्तदुभयं यथा दिविश्रितवन्तश्चंद्रसैंहिके
यभयाद्भुवि प्राप्तस्यापयतंनेगिसाभ्रयस्ततोभयम् अत्र न केवलं प्राप्त एव हाना
र्थं परिहार्यनवाप्तिः किंतु साधस्यानर्थवाप्तिरिति दृष्टिं एवानिष्टहेतोः
र्थसमुद्यमात् तदुभयं यथा दिवि यत्तमाहते वीलंतमारीय्यदमाननः अत्रानीयस

५वा

गुरुः

कु॰ते॰ ५२ पुरस्यैव सद्योऽदहनमनन्यभृत् पुरस्यैवेत्येवकारेणापरानिष्टप्राप्त्यभावो व्यंजितः अनिष्ट
प्राप्त्यवाप्तिश्चेति श्लोके निष्ठाधारोपि शङ्करसंहृतानामारूढानवाप्तिश्चेति प्रत्येकमपि
विषमपदेनान्वयः तत्र केवलानिष्टप्रतिलम्भः केवलेष्टानवाप्तिश्चेति अन्यदपि विष
मद्वयेऽलङ्कृतिर्भवति अत्र केवलानिष्टप्रतिलम्भो यथा पद्मातपत्ररसिके सरसीरुहस्य
किं बीजमर्पयितुमिच्छसि वापिकायां कालः कलिर्जगदिदं न कृतज्ञमत्र स्थित्वा हरिण्य
तितवैवमुखस्य लक्ष्मीम् अत्र पद्मातपत्रलिप्सया पद्मबीजवापं कृतवत्या लक्ष्मीला
भस्य किंतु मुखशोभाहरणरूपोऽत्यन्तानिष्टप्रतिलम्भः केवलेष्टानवाप्तिर्यथा प्रि
यासि मे च शैले विभ्रमो वयमिति वदन् तुष्टिपिपासालम्बुजः भ्रमभ्रमवितत बाहुयुगो
पेसुहंससमूहरिर्जयति अत्र यद्यपि शैलस्योपरि पतनरूपानिष्टावाप्तिः प्रसक्ता तथा
पि भगवत्कराम्बुजस्पर्शमहिम्ना सा च न जातेति शैलधारणरूपेष्टानवाप्तिमात्रम् यथा श्री॰
वा लोके कलंकमपहर्तुमयं मृगाङ्को जातो मुखं तव पुनस्तिलकच्छलेन तत्रापि कलं ५२
यसि तन्निकलंकरेखां नार्थे समाश्रितजनेऽपि कलंकयंतीति अत्रानर्थपरिहाररूपेष्टानवा
प्तिः

यथा वा प्राणोप्यद्भुतेन तनयानन्दनस्य ग्रामीभेमान्दुग्रहो भगवता मयि यातितोयं कृष्णो
दृष्टान्नपि खलु तितिक्षिं थनेहो बीजप्ररोहजनं नीटदूनं करोति अत्र पूर्णानिष्टमायथा
कृपेक्षानवानिःसृतेनिष्ठस्यापि मुनिगणस्य महादुःखप्रदत्त्वलाभावस्येभावगर्भतया
